# Shri Balashtottarashatanamavali 2

# श्रीबालाष्टोत्तरशतनामावलिः २

## Document Information

Text title : bAlAShTottarashatanAmAvalI 2

File name : bAlAShTottarashatanAmAvalI2.itx

Category : aShTottarashatanAmAvalI, devii, dashamahAvidyA, nAmAvalI, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Balasaparya

Latest update : August 23, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Shri Balashtottarashatanamavali 2

# श्रीबालाष्टोत्तरशतनामावलिः २

ओं ऐं ह्रीं श्रीं श्रीबालायै नमः । श्रीमहादेव्यै नमः ।
श्रीमत्पञ्चासनेश्वर्यै नमः । शिववामाङ्गसम्भूतायै नमः ।
शिवमानसहंसिन्यै नमः । त्रिस्थायै नमः । त्रिनेत्रायै नमः ।
त्रिगुणायै नमः । त्रिमूर्तिवशवर्तिन्यै नमः । त्रिजन्मपापसंहर्त्र्यै नमः ।
त्रियम्बककुटुम्बिन्यै नमः । बालार्ककोटिसङ्काशायै नमः ।
नीलालकलसत्कचायै नमः । फालस्थहेमतिलकायै नमः ।
लोलमौक्तिकनासिकायै नमः । पूर्णचन्द्राननायै नमः ।
स्वर्णताटङ्कशोभितायै नमः । हरिणीनेत्रसाकारकरुणापूर्णलोचनायै नमः ।
दाडिमीबीजरदनायै नमः । बिम्बोष्ठ्यै नमः । २०

मन्दहासिन्यै नमः । शङ्खःग्रीवायै नमः । चतुर्हस्तायै नमः ।
कुचपङ्कजकूड्मलायै नमः । ग्रैवेयाङ्गदमाङ्गल्यसूत्रशोभितकन्धरायै नमः ।
वटपत्रोदरायै नमः । निर्मलायै नमः । घनमण्डितायै नमः ।
मन्दावलोकिन्यै नमः । मध्यायै नमः । कुसुम्भवदनोज्ज्वलायै नमः ।
तप्तकाञ्चनकान्त्याढ्यायै नमः । हेमभूषितविग्रहायै नमः ।
माणिक्यमुकुरादर्शजानुद्वयविराजितायै नमः ।
कामतूणीरजघनायै नमः । कामप्रेष्ठगतल्पगायै नमः ।
रक्ताब्जपादयुगलायै नमः । क्वणन्माणिक्यनूपुरायै नमः ।
वासवादिदिशानाथपूजिताङ्घ्रिसरोरुहायै नमः ।
वराभयस्फाटिकाक्षमालापुस्तकधारिण्यै नमः । ४०

स्वर्णकङ्कणज्वालाभकराङ्गुष्ठविराजितायै नमः ।
सर्वाभरणभूषाढ्यायै नमः । सर्वावयवसुन्दर्यै नमः ।
एङ्काररूपायै नमः । ऐङ्कार्यै नमः । ऐश्वर्यफलदायिन्यै नमः ।
क्लीङ्काररूपायै नमः । क्लीङ्कार्यै नमः । क्लृप्तब्रह्माण्डमण्डलायै नमः ।
सौःकाररूपायै नमः । सोः कार्यै नमः । सौन्दर्यगुणसंयुतायै नमः ।
सचामररतीन्द्राणीसव्यदक्षिणसेवितायै नमः ।

बिन्दुत्रिकोणषट्कोणवृत्ताष्टदलसंयुतायै नमः ।
सत्यादिलोकपालान्तदेव्यावरणसेवितायै नमः ।
ओड्याणपीठनिलयायै नमः । ओजस्तेजःस्वरूपिण्यै नमः ।
अनङ्गपीठनिलयायै नमः । कामितार्थफलप्रदायै नमः ।
जालन्धरमहापीठायै नमः । ६०

जानकीनाथसौदर्यै नमः । पूर्णागिरिपीठगतायै नमः ।
पूर्णायुःसुप्रदायिन्यै नमः । मन्त्रमूर्त्यै नमः । महायोगायै नमः ।
महावेगायै नमः । महाबलायै नमः । महाबुद्ध्यै नमः ।
महासिद्ध्यै नमः । महादेवमनोहर्यै नमः । कीर्तियुक्तायै नमः ।
कीर्तिधरायै नमः । कीर्तिदायै नमः । कीर्तिवैभवायै नमः ।
व्याधिशैलव्यूहवज्रायै नमः । यमवृक्षकुठारिकायै नमः ।
वरमूर्तिगृहावासायै नमः । परमार्थस्वरूपिण्यै नमः । कृपानिधये नमः ।
कृपापूरायै नमः । ८०

कृतार्थफलदायिन्यै नमः । अष्टात्रिंशत्कलामूर्त्यै नमः ।
चतुःषष्टिकलात्मिकायै नमः । चतुरङ्गबलादात्र्यै नमः ।
बिन्दुनादस्वरूपिण्यै नमः । दशाब्दवयसोपेतायै नमः ।
दिविपूज्यायै नमः । शिवाभिधायै नमः । आगमारण्यमायूर्यै नमः ।
आदिमध्यान्तवर्जितायै नमः । कदम्बवनसम्पन्नायै नमः ।
सर्वदोषविनाशिन्यै नमः । सामगानप्रियायै नमः । ध्येयायै नमः ।
ध्यानसिद्धाभिवन्दितायै नमः । ज्ञानमूर्त्यै नमः । ज्ञानरूपायै नमः ।
ज्ञानदायै नमः । भयसंहरायै नमः । तत्त्वज्ञानायै नमः ॥ १००

तत्त्वरूपायै नमः । तत्त्वमय्यै नमः । आश्रितावन्यै नमः ।
दीर्घायुर्विजयारोग्यपुत्रपौत्रप्रदायिन्यै नमः ।
मन्दस्मितमुखाम्भोजायै नमः । मङ्गलप्रदमङ्गलायै नमः ।
वरदाभयमुद्राढ्यायै नमः । बालात्रिपुरसुन्दर्यै नमः ॥ १०८

इति श्रीबालाष्टोत्तरशतनामावलिः २ सम्पाता ।

Proofread by PSA Easwaran

*Shri Balashtottarashatanamavali 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*